# .. rAghavAShTakam ..

# ॥ રાઘવાષ્ટકમ્ ॥

## Document Information

Text title : rAghavAShTakam

File name : rAghavAShTaka.itx

Category : aShTaka

Location : doc_raama

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : N.Balasubramanian bbalu at sify.com

Proofread by : N.Balasubramanian bbalu at sify.com

Latest update : NOvember 28, 2008

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ રાઘવાષ્ટકમ્ ॥

રાઘવં કરુણાકરં મુનિ-સેવિતં સુર-વન્દિતં
    જાનકીવદનારવિન્દ-દિવાકરં ગુણભાજનમ્ ।
વાલિસૂનુ-હિતૈષિણં હનુમત્પ્રિયં કમલેક્ષણં
    યાતુધાન-ભયંકરં પ્રણમામિ રાઘવકુઞ્જરમ્ ॥ ૧॥

મૈથિલીકુચ-ભૂષણામલ-નીલમૌક્તિકમીશ્વરં
    રાવણાનુજપાલનં રઘુપુઙ્ગવં મમ દૈવતમ્ ।
નાગરી-વનિતાનનાંબુજ-બોધનીય-કલેવરં
    સૂર્યવંશવિવર્ધનં પ્રણમામિ રાઘવકુઞ્જરમ્ ॥ ૨॥

હેમકુણ્ડલ-મણ્ડિતામલ-કણ્ઠદેશમરિન્દમં
    શાતકુંભ-મયૂરનેત્ર-વિભૂષણેન-વિભૂષિતમ્ ।
ચારુનૂપુર-હાર-કૌસ્તુભ-કર્ણભૂષણ-ભૂષિતં
    ભાનુવંશ-વિવર્ધનં પ્રણમામિ રાઘવકુઞ્જરમ્ ॥ ૩ ॥

દણ્ડકાખ્યવને રતામર-સિદ્ધયોગિ-ગણાશ્રયં
    શિષ્ટપાલન-તત્પરં ધૃતિશાલિપાર્થ-કૃતસ્તુતિમ્ ।
કુંભકર્ણ-ભુજાભુજંગવિકર્તને સુવિશારદં
    લક્ષ્મણાનુજવત્સલં પ્રણમામિ રાઘવકુઞ્જરમ્ ॥ ૪॥

કેતકી-કરવીર-જાતિ-સુગન્ધિમાલ્ય-સુશોભિતં
    શ્રીધરં મિથિલાત્મજાકુચ-કુંકુમારુણ-વક્ષસમ્ ।
દેવદેવમશેષભૂત-મનોહરં જગતાં પતિં
    દાસભૂતભયાપહં પ્રણમામિ રાઘવકુઞ્જરમ્ ॥ ૫॥

યાગદાન-સમાધિ-હોમ-જપાદિકર્મકરૈર્દ્વિજૈઃ
    વેદપારગતૈરહર્નિશમાદરેણ સુપૂજિતમ્ ।
તાટકાવધહેતુમંગદતાત-વાલિ-નિષૂદનં
    પૈતૃકોદિતપાલકં પ્રણમામિ રાઘવકુઞ્જરમ્ ॥ ૬॥

લીલયા ખરદૂષણાદિ-નિશાચરાશુ-વિનાશનં
    રાવણાન્તકમચ્યુતં હરિયૂથકોટિ-ગણાશ્રયમ્ ।
નીરજાનનમંબુજાંઘ્રિયુગં હરિં ભુવનાશ્રયં
    દેવકાર્ય-વિચક્ષણં પ્રણમામિ રાઘવકુઞ્જરમ્ ॥ ૭॥

કૌશિકેન સુશિક્ષિતાસ્ત્ર-કલાપમાયત-લોચનં
    ચારુહાસમનાથ-બન્ધુમશેષલોક-નિવાસિનમ્ ।

વાસવાદિ-સુરારિ-રાવણશાસનં ચ પરાંગતિં
    નીલમેઘ-નિભાકૃતિં પ્રણમામિ રાઘવકુઞ્જરમ્ ॥ ૮॥

રાઘવાષ્ટકમિષ્ટસિદ્ધિદમચ્યુતાશ્રય-સાધકં
    મુક્તિ-ભુક્તિફલપ્રદં ધન-ધાન્ય-સિદ્ધિ-વિવર્ધનમ્ ।
રામચન્દ્ર-કૃપાકટાક્ષદમાદરેણ સદા જપેત્
    રામચન્દ્ર-પદાંબુજદ્વય-સન્તતાર્પિત-માનસઃ ॥ ૯॥

રામ રામ નમોઽસ્તુ તે જય રામભદ્ર નમોઽસ્તુ તે
    રામચન્દ્ર નમોઽસ્તુ તે જય રાઘવાય નમોઽસ્તુ તે ।
દેવદેવ નમોઽસ્તુ તે જય દેવરાજ નમોઽસ્તુ તે
    વાસુદેવ નમોઽસ્તુ તે જય વીરરાજ નમોઽસ્તુ તે ॥ ૧૦॥

॥ ઇતિ શ્રીરાઘવાષ્ટકં સંપૂર્ણમ્ ॥

Encoded and proofread by
N. Balasubramanian bbalu at sify.com
PSA Easwaran

.. rAghavAShTakam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*